# Shivashankara Stuti

# શિવશઙ્કરસ્તુતિઃ

## Document Information

Text title : Shivashankara Stuti by Parashuram

File name : shivashankarastutiHparashurAma.itx

Category : shiva

Location : doc_shiva

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Description/comments : brahmANDapurANam, madhyabhAgaH 3 upodghAtapAdaH | adhyAya: 25 - jAmdagneyakRitashivastutiH | 5 - 31 ||

Latest update : March 8, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 8, 2023

*sanskritdocuments.org*

# શિવશઙ્કરસ્તુતિઃ

પરશુરામ ઉવાચ -
નમસ્તે દેવદેવેશ નમસ્તે પરમેશ્વર ।
નમસ્તે જગતો નાથ નમસ્તે ત્રિપુરાન્તક ॥ ૧॥

નમસ્તે સકલાધ્યક્ષ નમસ્તે ભક્તવત્સલ ।
નમસ્તે સર્વભૂતેશ નમસ્તે વૃષભધ્વજ ॥ ૨॥

નમસ્તે સકલાધીશ નમસ્તે કરુણાકર ।
નમસ્તે સકલાવાસ નમસ્તે નીલલોહિત ॥ ૩॥

નમઃ સકલદેવારિગણનાશાય શૂલિને ।
કપાલિને નમસ્તુભ્યં સર્વલોકૈકપાલિને ॥ ૪॥

શ્મશાનવાસિને નિત્યં નમઃ કૈલાસવાસિને ।
નમોઽસ્તુ પાશિને તુભ્યં કાલકૂટવિષાશિને ॥ ૫॥

વિભવેઽમરવન્દ્યાય પ્રભવે તે સ્વયમ્ભુવે ।
નમોઽખિલજગત્કર્મસાક્ષિભૂતાય શમ્ભવે ॥ ૬॥

નમસ્ત્રિપથગાફેનભાસિગાર્દ્ધેન્દુમૌલિને ।
મહાભોગીન્દ્રહારાય શિવાય પરમાત્મને ॥ ૭॥

ભસ્મસંચ્છન્નદેહાય નમોઽર્કાગ્નીન્દુચક્ષુષે ।
કપર્દિને નમસ્તુભ્યમન્ધકાસુરમર્દ્દિને ॥ ૮॥

ત્રિપુરધ્વંસિને દક્ષયજ્ઞવિધ્વંસિને નમઃ ।
ગિરિજાકુચકાશ્મીરવિરઞ્જિતમહોરસે ॥ ૯॥

મહાદેવાય મહતે નમસ્તે કૃત્તિવાસસે ।
યોગિધ્યેયસ્વરૂપાય શિવાયાચિન્ત્યતેજસે ॥ ૧૦॥

સ્વભક્તહૃદયામ્ભોજકર્ણિકામધ્યવર્ત્તિને ।

સકલાગમસિદ્ધાન્તસારરૂપાય તે નમઃ ॥ ૧૧॥

નમો નિખિલયોગેન્દ્રબોધનાયામૃતાત્મને ।
શઙ્કરાયાખિલવ્યાપ્તમહિમ્ને પરમાત્મને ॥ ૧૨॥

નમઃ શર્વાય શાન્તાય બ્રહ્મણે વિશ્વરુપિણે ।
આદિમધ્યાન્તહીનાય નિત્યાયાવ્યક્તમૂર્તયે ॥ ૧૩॥

વ્યક્તાવ્યક્તસ્વરૂપાય સ્થૂલસૂક્ષ્માત્મને નમઃ ।
નમો વેદાન્તવેદ્યાય વિશ્વવિજ્ઞાનરૂપિણે ॥ ૧૪॥

નમઃ સુરાસુરશ્રેણિમૌલિપુષ્પાર્ચિતાઙ્ઘ્રયે ।
શ્રીકણ્ઠાય જગદ્ધાત્રે લોકકર્ત્રે નમોનમઃ ॥ ૧૫॥

રજોગુણાત્મને તુભ્યં વિશ્વસૃષ્ટિવિધાયિને ।
હિરણ્યગર્ભરૂપાય હરાય જગદાદયે ॥ ૧૬॥

નમો વિશ્વાત્મને લોકસ્થિતિવ્યાપારકારિણે ।
સત્ત્વવિજ્ઞાનરૂપાય પરાય પ્રત્યગાત્મને ॥૧૭॥

તમોગુણવિકારાય જગત્સંહારકારિણે ।
કલ્પાન્તે રુદ્રરૂપાય પરાપરવિદે નમઃ ॥ ૧૮॥

અવિકારાય નિત્યાય નમઃ સદસદાત્મને ।
બુદ્ધિબુદ્ધિપ્રબોધાય બુદ્ધીન્દ્રિયવિકારિણે ॥ ૧૯॥

વસ્વાદિત્યમરુદ્ભિશ્ચ સાધ્યરુદ્રાશ્વિભેદતઃ ।
યન્માયાભિન્નમતયો દેવાસ્તસ્મૈ નમોનમઃ ॥ ૨૦॥

અવિકારમજં નિત્યં સૂક્ષ્મરૂપમનૌપમમ્ ।
તવ યત્તન્ન જાનન્તિ યોગિનોઽપિ સદાઽમલાઃ ॥ ૨૧॥

ત્વામવિજ્ઞાય દુર્જ્ઞેયં સમ્યગ્બ્રહ્માદયોઽપિ હિ ।
સંસરન્તિ ભવે નૂનં ન તત્કર્માત્મકાશ્ચિરમ્ ॥ ૨૨॥

યાવન્નોપૈતિ ચરણૌ તવાજ્ઞાનવિઘાતિનઃ ।
તાવદ્ભ્રમતિ સંસારે પણ્ડિતોઽચેતનોઽપિ વા ॥ ૨૩॥

સ એવ દક્ષઃ સ કૃતી સ મુનિઃ સ ચ પણ્ડિતઃ ।
ભવતશ્ચરણામ્ભોજે યેન બુદ્ધિઃ સ્થિરીકૃતા ॥ ૨૪॥

સુસૂક્ષ્મત્વેન ગહનઃ સદ્ભાવસ્તે ત્રયીમયઃ ।
વિદુષામપિ મૂઢેન સ મયા જ્ઞાયતે કથમ્ ॥ ૨૫॥

અશબ્દગોચરત્વેન મહિમ્નસ્તવ સામ્પ્રતમ્ ।
સ્તોતુમપ્યનલં સમ્યક્ત્વામહં જડધીર્યતઃ ॥ ૨૬॥

તસ્માદજ્ઞાનતો વાપિ મયા ભક્ત્યૈવ સંસ્તુતઃ ।
પ્રીતશ્ચ ભવ દેવેશ નનુ ત્વં ભક્તવત્સલઃ ॥ ૨૭॥

॥ ઇતિ બ્રહ્માણ્ડપુરાણાન્તર્ગતા પરશુરામપ્રોક્તા શિવશઙ્કરસ્તુતિઃ ॥

બ્રહ્માણ્ડપુરાણમ્ ॥ મધ્યભાગઃ ૩ - ઉપોદ્ઘાતપાદઃ ।
અધ્યાયઃ ૨૫ - જામદગ્ન્યેયકૃતશિવસ્તુતિઃ । ૫ - ૩૧ ॥

Encoded and proofread by Ruma Dewan

*Shivashankara Stuti*

pdf was typeset on March 8, 2023

Please send corrections to *sanskrit@cheerful.com*